QDB – 28

## संस्कृत साहित्यम्

समय : त्रय घंटा:] [अंका : 200

***निर्देशा :*** *1) प्रश्न–पत्रमिदं त्रिषु भागेषु विभक्तमस्ति। प्रश्नानां संख्या तेषाम् अंकाश्च प्रत्येकं भागे निर्दिष्टा: सन्ति।*

*2) प्रश्न–पत्रे पृष्टानां प्रश्नानाम् उत्तराणि **संस्कृत**भाषया, **गुजराती**भाषया अथवा **आंग्ल**भाषया दातुं शक्यन्ते।*

*3) प्रत्येकस्मिन् भागे प्रश्नानाम् उत्तराणि निरन्तरं लेखनीयानि। अन्यभागै: सह उत्तराणि मिश्रितानि न भवेयु:। प्रत्येकं प्रश्न: एकत्र एव पूर्णरूपेण समाधेय: न तु यत्र तत्र अंशेषु। एवंकृते सति परीक्षकेण प्रश्नोत्तरस्य निरीक्षणं न करिष्यते।*

*4) परीक्षार्थिभि: निश्चितशब्दसीमानुसारमेव प्रश्नानाम् उत्तराणि लेखनीयानि।*

*5) प्रश्नोत्तरं तिसृषु भाषासु एकामेव भाषाम् अधिकृत्य लेखनीयम्। एकस्मिन् पत्रे भाषाद्वयं भाषात्रयं वा न आश्रयणीयम्।*

**विभाग: – अ** **अंका : 40**

***सूचना:*** *1) प्रश्न संख्या **1 – 20**.*

*2) सर्वेषां **20** प्रश्नानाम् उत्तराणि दातव्यानि।*

*3) प्रत्येकं प्रश्नस्य **2** गुणे स्त:।*

*4) उत्तराणि **20-30** शब्दमर्यादया लेखनीयानि।*

1. सांख्यदर्शनस्य प्रयोजनं प्रतिपादयत।

2. आचार्य विश्वनाथस्य अनुसारं गद्यकाव्यस्य कति भेदा: सन्ति ? के च ते ?

3. आचार्य मम्मटानुसारं काव्यलक्षणं प्रतिपादनीयम्।

4. 'सवर्ण संज्ञा' कस्यां परिस्थितौ भवति ?

5. शुकनासानुसारेण महती अनर्थपरम्परा का वर्तते ?

6. किं दृष्ट्वा आदिकवे: शोक: श्लोकत्वं प्राप्त: ?

7. 'हितं मनोहारि च दुर्लभं वच:'' क:, कदा किमर्थञ्च वदति ?

8. वाल्मीकि–रामायणे कति काण्डा: सन्ति ? के च ते ?

9. सतां मैत्री कीदृशी भवति ?

10. 'गद्यं कवीनां निकषं वदन्ति' सूक्ते: समीक्षा कार्या।

11. उक्ते कर्मणि का विभक्ति: क्रियते ?

12. महाभारते कति पर्वाणि सन्ति ? कानि च तानि ?

13. पञ्च महाकाव्यानि कानि सन्ति ? तेषां रचयितार: के सन्ति ?

14. 'तेन त्यक्तेन भुञ्जीथा: मा गृध: कस्यस्विद्धनम्' अस्य ससन्दर्भं विवरणं कार्यम्।

15. महाकवि भारवे: कालनिर्धारणं क्रियताम्।

अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि **संस्कृत**भाषायां शब्दमर्यादया लिखन्तु।

अस्ति कस्मिंश्चित्पर्वतैकदेशे महान् वृक्ष:। तत्र च सिन्धुकनामा कोऽपि पक्षी प्रतिवसति स्म। तस्य पुरीषे सुवर्णमुत्पद्यते। अथ कदाचित्तमुद्दिश्य व्याध: कोऽपि समाययौ। स च पक्षी तदग्रत एव पुरीषमुत्ससर्ज। अथ पातसमकालमेव तत्सुवर्णीभूतं दृष्ट्वा व्याधो विस्मयमगमत् – 'अहो मम शिशुकालादारभ्य शकुनिबन्धव्यसनिनोऽशीतिवर्षाणि समभूवन् , न च कदाचित् पक्षिपुरीषे सुवर्णं दृष्टम्' इति विचिन्त्य तत्र वृक्षे पाशं बबन्ध। अथासावपि पक्षी मूर्खस्तत्रैव विश्वस्तचित्तो यथा–पूर्वमुपविष्टस्तत्कालमेव पाशेन बद्ध:। व्याधस्तु तं पाशादुन्मुच्य पञ्जरके संस्थाप्य निजावासं नीतवान्। अथ चिन्तयामास 'कमनेन सापायेन पक्षिणाहं करिष्यामि ? यदि कदाचित् कोऽप्यमुमीदृशं ज्ञात्वा राज्ञे निवेदयिष्यति मन्नूनं प्राणसंशयो मे भवेत्, अत: स्वयमेव पक्षिणं राज्ञे निवेदयामि' इति विचार्य तथैवानुष्ठितवान्।

अथ राजाऽपि तं पक्षिणं दृष्ट्वा विकसितनयनवदनकमल: परां तुष्टिमुपगत:। प्राह चैव – 'हंहो रक्षापुरुषा:। एनं पक्षिणं यत्नेन रक्षत। अशनपानादिकं चास्य यथेच्छं प्रयच्छत।' अथ मन्त्रिणाभिहितम् – 'किमनेनाश्रद्धेय व्याधवचनमात्रपरिगृहीतेनाण्डजेन ? किं कदाचित्पक्षीपुरीषे सुवर्णं सम्भवति ? तन्मुच्यतां पञ्जरबन्धनादयं पक्षी।' इति मन्त्रिवचनाद्राज्ञा मोचितोऽसौ पक्ष्युन्नतद्वारतोरणे समुपविश्य सुवर्णमयीं विष्ठां विधाय यथासुखमाकाशमार्गेण प्रायात्।

**प्रश्ना:**

16. सिन्धुकपक्षिण: का विशेषता ?

17. सिन्धुकस्य पुरीषं दृष्ट्वा व्याध: किं चिन्तितवान् ?

18. व्याध: सिन्धुकं कुत्र स्थापितवान् नीतवान् च ?

19. व्याध: सिन्धुकं राज्ञ: समीपं किमर्थं नीतवान् ?

20. पक्षिणं दृष्ट्वा राजा किम् आज्ञापितवान् ?

**विभाग: – ब** **अंका : 60**

***सूचना:*** *1) प्रश्न संख्या* ***21 – 32****.*

*2) सर्वेषां* ***12*** *प्रश्नानाम् उत्तराणि दातव्यानि।*

*3) प्रतिप्रश्नं* ***5*** *गुणा: सन्ति।*

*4) उत्तराणि* ***50-60*** *शब्दमर्यादया लेखनीयानि।*

21. वैदिकव्याख्याकार सायणस्य स्थानं योगदानञ्च उपस्थापयत।

22. शुकनासोपदेशस्य गुरूपदेशमहत्त्वं वर्णयत।

23. जैनसम्मतं ''स्याद्वादम् '' संक्षेपेण विवेचयत।

24. परवर्तिसाहित्ये रामायणस्य प्रभावं निरूपयत।

25. ईशावास्योपनिषद: दर्शनं संक्षेपेण विविच्यताम्।

26. मनुस्मृतिमनुसृत्य राजप्रशंसां निरूपयत।

27. नीतिशतके वर्णितं विद्याया: महत्त्वं वर्णयत।

28. बौद्धदर्शनसम्मतं 'कर्म' संक्षेपेण निरूपयत।

29. योगस्य अष्टावङ्गानि कानि सन्ति ? संक्षेपेण वर्णयत।

30. पद्यमिदं व्याख्येयम् –

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्।

31. 'रत्नावली' नाटिकाया: संक्षेपेण कथासारं प्रतिपादयत।

32. मम्मटानुसारं मध्यमकाव्यं व्याख्यायताम्।

**विभाग: – स** **अंका : 100**

***सूचना:***
*1) प्रश्न संख्या **33 – 39**.*
*2) सप्तम्य: **पञ्च** प्रश्नानाम् उत्तराणि दातव्यानि।*
*3) प्रत्येकं प्रश्नस्य **20** गुणा: सन्ति।*
*4) उत्तराणि **200** शब्दमर्यादया लेख्यानि।*

33. न्यायदर्शनम् आश्रित्य प्रमाणव्यवस्थां वर्णयत।

34. कठोपनिषद: सन्देशविशेषं ससन्दर्भं निरूपयत।

35. 'योगश्चित्तप्रवृत्ति-निरोध:' निरूपयत।

36. ऋक् 10.129 इति क्रमाङ्कस्य नासदीयसूक्तस्य परिचयात्मकं विवरणं लिखत।

37. ऋक् 10.125 इति क्रमाङ्कस्य वाक्सूक्तस्य सन्दर्भात्मकं परिचयं लिखत।

38. रामायणस्य सुन्दरकाण्डस्य महत्त्वं प्रतिपादयत।

39. संस्कृतवाङ्मये महाभारतस्य प्रभावं वर्णयत।